त्तवं पुष्पफलं दर्शयन्ति वनद्रुमाः ॥ गर्भिण्यो राजपुत्रांश्च जनयन्ति विभीषणान् । क्रव्यादाः पक्षिणश्चापि सहाश्नन्ति परस्परम् ॥ त्रिविषाणाश्चतुर्नेत्राः पञ्चपादा द्विमेहनाः । द्विशीर्षाश्च द्विपुच्छाश्च दंष्ट्रिणः पशवोऽशिवाः ॥ जायन्ते विवृतास्याश्च व्याहरन्तोऽशिवा गिरः । त्रिपदाः शिखिनस्तार्क्ष्याश्चतुर्द्दंष्ट्रा विषाणिनः ॥ तथैवान्याश्च दृश्यन्ते स्त्रियो वै ब्रह्मवादिनाम् । वैनतेयान् मयूरांश्च जनयन्त्यः पुरे तव ॥ गोवत्सं बड़वा सूते श्वा शृगालं महीपते ! । कुक्कुटान् करभांश्चैव शुकांश्चाशुभवादिनः ॥ स्त्रियः काश्चित् प्रजायन्ते चतस्रः पञ्च कन्यकाः । जातमात्राश्च नृत्यन्ति गायन्ति प्रहसन्ति च ॥ पृथग्जनस्य सर्वस्य क्षुद्रकाः प्रहसन्ति च । नृत्यन्ति परिगायन्ति वेदयन्तो महद्भयम् । प्रतिमाश्चालिखन्त्येते सशस्त्राः कालचोदिताः अन्योन्यमभिधावन्ति शिशवो दण्डपाणयः । अन्योन्यमवमृद्नन्ति नगराणि युयुत्सवः ॥ पद्मोत्पलानि वृक्षेषु जायन्ते कुमुदानि च । विष्वग्वाताश्च वान्त्युग्रा रजो नाप्युपशाम्यति । अभीक्ष्णं कम्पते भूमिरर्कं राहुरुपैति च । श्वेतो ग्रहस्तथा चित्रां समतिक्रम्य तिष्ठति । अभावं हि विशेषेण कुरूणां तत्र पश्यति ॥ धूमकेतुर्म्महाघोरः पुष्यञ्चाक्रम्य तिष्ठति । सेनयोरशिवं घोरं करिष्यति महाग्रहः ॥ मघास्वङ्गारको वक्रः श्रवणे च वृहस्पतिः । भाग्यं(मघाम्)नक्षत्रमाक्रम्य सूर्य्यपुत्रेण पीड्यते ॥ शुक्रः प्रौष्ठपदे पूर्व्वे समारुह्य विरोचते । उत्तरे तु परिक्रम्य सहितः समुदीक्ष्यते ॥ श्वेतो ग्रहः प्रज्वलितः सधूम इव पावकः । ऐन्द्रं तेजस्वि नक्षत्रं ज्येष्ठामाक्रम्य तिष्ठति ॥ ध्रुवं प्रज्वलितं घोरमपसव्यं प्रवर्त्तते । रोहिणीं च पीड़यत उभौ च शशिभास्करौ ॥ चित्रास्वात्यन्तरे चैव धिष्ठितः परुषो ग्रहः । वक्रानुवक्रं कृत्वा च श्रवणं पावकप्रभः । ब्रह्मराशिं समावृत्य लोहिताङ्गो व्यवस्थितः ॥ सर्व्वसस्यपरिच्छन्ना पृथिवी सस्यशालिनी । पञ्चशीर्षा यवाश्चापि शतशीर्षाश्च शालयः ॥ प्रधानाः सर्व्वलोकस्य यास्वायत्तमिदं जगत् । ता गावः प्रस्नुता वत्सैः शोणितं प्रक्षरन्त्युत ॥ निश्चेरुरर्चिषश्चापात् खड्गाश्च ज्वलिनो भृशम् । व्यक्तं पश्यन्ति शस्त्राणि संग्रामं समुपस्थितम् ॥ अग्निवर्णा यथा भासः शस्त्राणामुदकस्य च । कवचानां ध्वजानाञ्च भविष्यति महान् क्षयः ॥ पृथ्वी शोणितावर्त्ता ध्वजोडुपसमाकुला । कुरूणां वैशसे राजन् ! पाण्डवैः सह भारत ! ॥ दिक्षु प्रज्वलितास्याश्च व्याहरन्ति मृगद्विजाः । अत्याहितं दर्शयन्तो वेदयन्ति महद्भयम् ॥ एकपक्षाक्षिचरणः शकुनिः खचरो निशि । रौद्रं नदति संरब्धः शोणितं छर्द्दयन्निव ॥ शस्त्राणि चैव राजेन्द्र ! प्रज्वलन्तीव संप्रति । सप्तर्षीणामुदाराणां समवच्छाद्यते प्रभा ॥ संवत्सरस्थायिनौ च ग्रहौ प्रज्वलितावुभौ । विशाखायाः समीपस्थौ वृहस्पतिशनैश्चरौ ॥ चन्द्रादित्यावुभौ ग्रस्तावेकपक्षे त्रयोदशीम् । अपर्व्वणि ग्रहं यातौ प्रजासंक्षयमिच्छतः ॥ अशोभिता दिशः सर्व्वाः पांशुवर्षैः समन्ततः । उत्पातमेघा रौद्राश्च रात्रौ वर्षन्ति शोणितम् ॥ कृत्तिका पीड्यते तीक्ष्णैर्नक्षत्रं पृथिवीपते ! ॥ अभीक्ष्णं वाता वायन्ते धूमकेतुमवस्थिताः । विषमं जनयन्त्येत आक्रन्दजननं महत् ॥ त्रिषु कृत्तेषु सर्व्वेषु नक्षत्रेषु विशाम्पते ! गृध्रः संपतते दीर्घः जनयन् भयमुत्तमम् ॥ चतुर्द्दशीं पञ्चदशीं भूतपूर्व्वां च षोड़शीम् । इमान्तु नाभिजानामि भूतपूर्व्वां त्रयोदशीम् ॥ चन्द्रसूर्य्यावुभौ ग्रस्तावेकमासे त्रयोदशीम् । अपर्व्वणि ग्रहावेतौ प्रजाः संक्षययिष्यतः । शोणितैर्व्वक्त्रसम्पूर्णा अतृप्तास्तत्र राक्षसाः । प्रतिस्रोतोवहा नद्यः सरितः शोणितोदकाः । फेनायमानाः कूपाश्च कूर्द्दन्ति वृषभा इव ॥ पतन्त्युल्काः सनिर्घाताः शक्राशनिसमप्रभाः । अद्य चैव निशां व्युष्टामुदये भानुराहतः ॥ ज्वलन्तीभिश्च वह्नीभिरुल्काभिः सर्व्वतो दिशम् । अन्योन्यमवसृष्यद्भिस्तत्र चोक्तं महर्षिभिः । भूमिपालसहस्राणां भूमिः पास्यति शोणितम् ॥ कैलासमन्दराभ्यान्तु तथा हिमवतो गिरेः । सहस्रशो महाशब्दाः शिखराणि पतन्ति च ॥ महाभूता भूमिकम्पे चत्वारः सागराः पृथक् । वेलामुद्वर्त्तयन्तीव क्षोभयन्तो वसुन्धराम् । वृक्षानुन्मथ्य वान्त्युग्रा वाताः शर्करकर्षिणः ॥ अभग्नाः सुमहावातैरशनीभिः समाहताः । वृक्षाः पतन्ति चैत्याश्च ग्रामेषु नगरेषु च । नीललोहितपीतश्च भवत्यग्निर्हुतो द्विजैः । वामार्चिर्दुष्टगन्धश्च मुञ्चन् वै दारुणं स्वनम् ॥ स्पर्शा गन्धा रसाश्चैव विपरीता महीपते ! । धूमं ध्वजाः प्रमुञ्चन्ति कम्पमाना मुहुर्मुहुः ॥ मुञ्चन्त्यङ्गारवर्षञ्च भेर्यश्च पटहास्तथा ॥ शिखराणां समन्ताद्धाग्रामाकुपरिष्टात् समन्ततः । वायसाश्च रुवन्त्युग्रं वामं मण्डलमाश्रिताः । पक्वापक्वेति सुभृशं वावाश्यन्ते वयांसि च ॥ निलीयन्ते ध्वजाग्रेषु क्षयाय पृथिवीक्षिताम् ॥ ध्यायन्तः प्रकिरन्तश्च व्याला वेपथुसंयुताः । दीनास्तुरङ्गमाः सर्वे वारणाः सलिलाश्रयाः” इति असाधारणानि अमङ्गलानि च दर्शितानि यथा ‘मुक्तकेशीं छिन्ननासां रुदतीञ्च दिगम्बराम् । कृष्णवस्त्रपरीधाना-